# Shri Chandika Stuti

# શ્રીચણ્ડિકાસ્તુતિઃ

## Document Information

Text title : Chandika Stutih

File name : chaNDikAstutiH.itx

Category : devii, devI, durgA, aShTaka

Location : doc_devii

Author : Durgaprasad DvivedI

Transliterated by : Rajani Arjun Shankar

Proofread by : Rajani Arjun Shankar

Latest update : October 30, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 30, 2020

*sanskritdocuments.org*

# શ્રીચણ્ડિકાસ્તુતિઃ

વિવિક્તતર-ગોમતી-જઠર-મધ્ય-સિદ્ધાશ્રમાં
પુરોગત-સરોવર-સ્ફુરદગાધ-પાથશ્છટામ્ ।
વિશાલ-તલતુઙ્ગ-ભૂલુલિત-નિમ્બમૂલાલયાં
ભજામિ ભયખણ્ડિકાં સપદિ ચણ્ડિકામમ્બિકામ્ ॥ ૧॥

ન લક્ષ્ય-ઘટનાશ્રયાં ન ચ વિશેષ-વેશ્માવહાં
ઘટાનુકૃતિ-ગોમતી-વહન-ભાવ્યમાનાસ્પદામ્ ।
નમજ્જન-મનોરથારચન-ચારુ-ચિન્તામણિં
ભજામિ ભયખણ્ડિકાં સપદિ ચણ્ડિકામમ્બિકામ્ ॥ ૨॥

નિરન્તર-સમુલ્લસત્કમલ-કીર્ણ-પાથોજિની-
પ્રતાન-ઘનસમ્પદા કમપિ સમ્મદં તન્વતીમ્ ।
ત્રિકોણ-સરસીમયીં, પરિણતિં પુરો બિભ્રતીં,
ભજામિ ભયખણ્ડિકાં સપદિ ચણ્ડિકામમ્બિકામ્ ॥ ૩॥

અનુગ્રહ-રસચ્છટામિવ સરઃશ્રિયં યાન્તિકે
વિકાસયતિ, પદ્મિનીદલ-સહસ્રસન્દાનિતામ્ ।
પ્રતિક્ષણ-સમુન્મિષત્પ્રમદ-મેદુરાં તામહં,
ભજામિ ભયખણ્ડિકાં સપદિ ચણ્ડિકામમ્બિકામ્ ॥ ૪॥

પ્રચણ્ડયતિ વિક્રમં, ઝટિતિ ખણ્ડયત્યાપદઃ
સુમણ્ડયતિ વાક્કલાં, સદસિ દણ્ડયત્યુદ્ધતાન્ ।
કરણ્ડયતિ રોદસી, ગુણ-સમૃદ્ધિભિર્યા હિ તાં
ભજામિ ભયખણ્ડિકાં સપદિ ચણ્ડિકામમ્બિકામ્ ॥ ૫॥

શ્રુતાઽભિલષિતા, મતા, સુકલિતા, સમભ્યર્ચિતા
સુધા-પૃષત-વર્ષિભિર્નવનવૈર્વચોભિઃ સ્તુતા ।
જયાય ખલુ કલ્પતે બહુવિધાદૃતા, તામહં
ભજામિ ભયખણ્ડિકાં સપદિ ચણ્ડિકામમ્બિકામ્ ॥ ૬॥

ઇતસ્તત ઉદિત્વર-વ્રતતિનદ્ધ-વૃક્ષાવલી-
    લુલદ્વિહગ-મણ્ડલી-મધુરરાવ-સંસેવિતામ્ ।
સ્ખલત્કુસુમ-સૌરભ-પ્રસર-પૂર્યમાણાશ્રમાં
    ભજામિ ભયખણ્ડિકાં સપદિ ચણ્ડિકામમ્બિકામ્ ॥ ૭॥

દ્વિષત્કુલ-કૃપાણિકાં, કુટિલકાલ-વિધ્વંસિકાં,
    વિપદ્ઘન-કુઠારિકાં, ત્રિવિધ-દુઃખ-નિર્વાસિકામ્ ।
કૃપાકુસુમ-વાટિકાં, પ્રણત-ભારતી-ભાસિકાં,
    ભજામિ ભયખણ્ડિકાં સપદિ ચણ્ડિકામમ્બિકામ્ ॥ ૮॥

બ્રહ્માણ્ડાધિક-દેહાપિ ગોમતી-તીર-ચઙ્ક્રમા ।
જયાય ભજતાં ભૂયાચ્ચણ્ડિકા ચણ્ડ-વિક્રમા ॥ ૯॥

ઇતિ દુર્ગાપ્રસાદદ્વિવેદીવિરચિતા ચણ્ડિકાસ્તુતિઃ સમાપ્તા ।

Encoded and proofread by Rajani Arjun Shankar

*Shri Chandika Stuti*

pdf was typeset on October 30, 2020

Please send corrections to *sanskrit@cheerful.com*